1

श्रीगणेशाय नमः॥ अथ ऋषय ऊचुः॥ सूत सूत महाभाग वदतां वर॥ यथा गुप्तः सह
स्राक्षः सर्वान् हत्वा रिपून् सैनिकान्॥१॥ क्रीडन्ति ह्यवनिर्जित्य त्रिलोकान् भुंजे च त्रि
यम्॥ शिवाख्यं कवचं स धामबेवा विश्वनृपतः॥२॥ सूत उवाच॥ नमस्कृत्य महा
देवं विश्वव्यापिनमीश्वरम्॥ वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्॥३॥ शुचौ
देशे समासीनो यथावत्कल्पितासनः॥ जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्य
॥१॥ यम्॥४॥ ॐ विजनं शक्तिः मंकीलकं शिवकवच स्तोत्र मंत्रस्य जपे विनियोगः॥ अनु
ष्टुप् छन्दः सदाशिवो देवता सदाशिवायांगुष्ठाभ्यां नमः॥ नं गंगाधराय तर्जनी ॥१॥
भ्यां नमः॥ मं मृत्युंजयाय मध्यमाभ्यां नमः॥ शिं शूलपाणये अनामिकाभ्यां नमः॥
वां पिनाकपाणये कनिष्ठिकाभ्यां॥ यं उमापतये करतलकरपृष्ठाभ्यां नमः॥ एवं हृ
दयादिन्यासः॥ अथ ध्यानम्॥ ध्यायेद्वं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासीनं समन्तात्स्तुति
ममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पंचवक्त्रं महेशं॥५॥

प्रभावः सद्यो विजातोऽवतु मां प्रतीच्याम् ॥१४॥ वराक्षमालाभयटंकहस्तः सरोजकिंज
ल्कसमानवर्णः ॥ त्रिलोचनश्चारु चतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः
॥१५॥ वेदाभयेष्टांकुशपाशटंककपालढक्काक्षत्रिशूलपाणिः ॥ सितद्युतिः पं
चमुखोऽवतान्मामीशान ऊर्द्ध्वं परमप्रकाशः ॥ मूर्द्धानमव्यान्मम चन्द्रमौलि
र्भालं ममाव्यादथ भालनेत्रः ॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु वि
श्वनाथः ॥१७॥ पायाच्छ्रुती मे श्रुतिगीतकीर्त्तिः कपोलमव्यात्सततं कपाली ॥
॥२॥ वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥१८॥ कंठं गिरीशोऽवतु नी ॥२॥
लकंठः पाणिद्वयं पातु पिनाकपाणिः ॥ दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं द
क्षमखान्तकोऽव्यात् ॥१९॥ ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनांतकारी ॥
हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥२०॥ ऊरुद्वयं पातु कुबेर
मित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ॥ जंघायुगं पुंगवकेतुरव्यात्पादौ ममाव्यात्सु
रवंद्यपादः ॥२१॥ महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ॥ त्र्यं
बकः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे ॥२२॥

श्रीविश्वम्भर उवाच ॥ हृत्पुण्डरीकान्तरसंनिविष्टं स्वतेजसा व्याप्तनभोवकाशम् ॥ अ-
तीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥६॥ ध्यानावधूताखिलकर्म-
बन्धश्चिरं चिदानन्दनिमग्नचेताः ॥ षडक्षरन्याससमाहितात्मा शैवेन कुर्या-
त्कवचेन रक्षाम् ॥७॥ मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ॥ तन्नामदिव्यं वर-
मन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥८॥ सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानन्दघन-
श्चिदात्मा ॥ अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥९॥ यो भूस्व-
रूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः ॥ योऽपां स्वरूपेण नृणां करोति
संजीवनं सोऽवतु मां जलेभ्यः ॥१०॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति
भूरिलीलः ॥ स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥११॥ प्रदी-
प्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्रा-
च्यां स्थितो रक्षतु मामजस्रम् ॥१२॥ कुठारखेटांकुशपाशशूलकपालढक्काक्षगु-
णान्दधानः ॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥१३॥
कुन्देन्दुशंखस्फटिकावभासो वेदाक्षमालावरदाभयांकः ॥ त्र्यक्षश्चतुर्वक्त्र उरु-

तापविसमित्त मसदुहानि व्याधि पचना शयनुमे जगतामधीशः ॥३०॥ ॐ नमो भगवते सदा
शिवाय सकलतत्वात्मकाय सकलतत्वविदूराय सकललोकैककर्त्रे सकललोकैकभर्त्रे
सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय स
कलवरप्रदाय सकलदुरितार्त्तिभंजनाय सकलजगदभयंकराय सकललोकैकशंकरा
य शशांकशेखराय शाश्वतनिजवासाय निराभासाय निरामयाय निरातंकाय निःप्र
पंचाय निःकलंकाय निर्द्वन्द्वाय निः[संगाय] निर्मलाय निर्गुणाय निरुपम
॥३॥ भवाय निराधाराय नित्यशुद्धबुद्ध सच्चिदानन्दाय परमशान्तप्रकाशाय तेजोरूपा
य तेजोमयाय जय जय महारुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पा
न्तभैरव कपालमालाधर खट्वांग खड्गचर्म पाशांकुश डमरु शूलचाप बाण
गदाशक्तिभिंदिपालतोमरमुशलमुद्गरपट्टिशपरिघपरशुपट्टिशभुशुंडिश
तघ्नी शंखचक्राद्यायुधभीषणाकार सहस्रमुख दंष्ट्राकराल विकटाट्टहास वि
स्फोटित ब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहार नागेन्द्रवलय नागेन्द्रच

पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे ॥ गौरीपतिः पातु निशावसाने
मृत्युंजयो रक्षतु सर्वकालम् ॥२३॥ अन्तःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु
वहिःस्थितं माम् ॥ तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ॥२४॥
तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ॥ वेदान्तवेद्योऽवतु
मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥२५॥ मार्गेषु मां रक्षतु नीलकण्ठः
शैलादि दुर्गेषु पुरत्रयारिः ॥ अरण्यवासादि महाप्रवासे पायान्मृगव्याध उदा
रशक्तिः ॥२६॥ कल्पान्तकाटोपपटुप्रकोप स्फुटाट्टहासोच्चलिताण्डकोशः घोरारि
सेनार्णवदुर्निवार महाभयाद्रक्षतु वीरभद्रः ॥२७॥ पत्त्यश्वमातंगघटावरूथसहस्र
लक्षायुतकोटिभीषणम् ॥ अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकु
ठारधारया ॥२८॥ निहन्तु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्तकस्य
॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान् संत्रासयत्वीशधनुः पिनाकः ॥२९॥ दुः
स्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ॥ उत्पात

सर्वदारिद्र्यशमनं सर्वमंगलवर्द्धनम् योधत्ते कवचं शैवं सदैवैरपि पूज्यते ॥३४॥ म
हापातकसंघातैर्मुच्यते चोपपातकैः देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥३५॥
त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् ॥ धारये [illegible] त्तो मप्रसात्तं सद्यः श्रे
योह्यवाप्स्यसि ॥३६॥ सूत उवाच ॥ इति तेर्षिणा तं सम्यगरपत्य द्धो ऽहं तया द्वि
ज ॥ यं प्राप्य हि रिपून् जित्वे विश्वरूपा चक्रवर्तितां ॥३७॥ इति श्री नेपालखंडे
शिववर्मकवचकथनं सप्तमोऽध्यायः ॥७॥

॥४॥

4

श्रीमन्महामृत्युंजय त्र्यंबक त्रिपुरांतक त्रिकालाग्निरुद्र नीलकंठ विरूपाक्ष विश्वेश्वर वि
श्वरूप वृषभवाहन विषभूषण विश्वतो मुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युभयं
नाशय नाशय सर्वरोगभयं नाशय नाशय विषसर्पभयं शमय शमय चौरान्मारय
मारय ममारातीन् उच्चाटय उच्चाटय त्रिशूलेन विदारय विदारय कुठारेण भिन्धि
भिन्धि खड्गेन छिन्धि छिन्धि खट्वांगेन विपोथय विपोथय मुशलेन निःपेषय निःपेष
य बाणैः संताडय संताडय कुष्माण्ड वेताल मारीगण ब्रह्मराक्षसान् संत्रासय संत्रा
सय ममाभयं कुरु कुरु वित्रस्तं मम आश्वासय मम आश्वासय नरकभयान्मामुद्धरोद्धर सं
5 जीवय संजीवय क्षुत्तृड्भ्यां मामाप्यायय पापाद्धेयदुःखातुरं मामानन्दय २ शिवकवचे
न ममाच्छादय छादय मृत्युंजय त्र्यंबक सदाशिव नमस्ते नमस्ते ऋषभ उवाच
इत्येतत्कवचं शैवं वरदं व्याहृतं मया सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनां ॥३१॥
यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् न तस्य जायते क्वापि भयं शंभोरनुग्र
हात् ॥३२॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोपि वा सद्यः सुखमवाप्नोति दी
र्घमायुश्च विन्दति ॥३३॥